# द्वितीयः खण्डः

## ( क ) अलङ्कारपरिचयः

काव्यशास्त्रे अलङ्काराणाम् अतिमहनीयं स्थानं वर्तते। अलङ्करोति इति अलङ्कारः, अलङ्क्रियतेऽनेनेति वा व्युत्पत्त्या अलङ्कारशब्देन शोभाधायकं वस्तुतत्त्वं वा उच्यते। लोकव्यवहारे यथा अलङ्काराः मानवाकृतिं भूषयन्ति, तस्य शोभां वर्धयन्ति, तथैव काव्यशास्त्रे शब्दार्थयोः सौन्दर्यवर्धकं तत्त्वम् 'अलङ्कार' इति उच्यते

'अलंकृतिः अलङ्कारः' इति व्युत्पत्त्या सौन्दर्यबोधः एव अलङ्कारः। अयं सौन्दर्यबोधः एव आलङ्कारिकैः काव्यस्य आत्मा इति निरूपितः।

**अलङ्कार-लक्षणम् –** भामह-आचार्येन काव्यशास्त्रे अलङ्काराणां प्राधान्यं स्वीकृतम्। प्राचीनैः आचार्यैः सौन्दर्यबोधस्य अभिधायकत्वेन काव्यशास्त्रे अलङ्काराणां प्राधान्यं स्वीकृतम्। यथा समग्रगुणसम्पन्नाऽपि नारी अलङ्कारान् विना न शोभते, तथैव काव्यमपि अलङ्काररहितं न शोभते।

अलङ्कारस्वरूपं निरूपयन् आचार्यदण्डी काव्यस्य समस्तान् शोभाधायकतत्त्वान् अलङ्कारशब्देन लक्षयति– "**काव्यशोभाकारान् धर्मान् अलङ्कारान् प्रचक्षते**"।

अलङ्कारशब्दस्य व्यापकतां सूचयन् आचार्यो वामनः काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलङ्कारशब्देन निरूपयति – '**सौन्दर्यम् अलङ्कारः**'।

अग्निपुराणकारेण तु अलङ्काररहितं काव्यं विधवैव निरूपितम्।

परं ध्वनिसम्प्रदायस्य प्रसिद्धिं प्राप्ते सति आचार्यैः अलङ्काराः अङ्गादिवत् शब्दार्थयोः शोभाधायकाः, रसस्य च उपकर्तारः इति निरूपिताः। यथोक्तं मम्मटेन –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**

**अलङ्काराः त्रिविधाः –**

एतेऽलङ्काराः 'यो यदाश्रितः सः तदलङ्कारः' (मम्मटः) इति नियमात् त्रिविधाः भवन्ति – १. शब्दालङ्कारः २. अर्थालङ्कारः ३. उभयालङ्कारः।

**१. शब्दालङ्कारः –**

शब्दाश्रितः योऽलङ्कारः सः शब्दालङ्कारः। यत्र काव्यसौन्दर्यं चमत्कृतिर्वा शब्दाधारिता भवति, सोऽलङ्कारः शब्दालङ्कारो वाच्यः। यथा – अनुप्रासः, यमकं, वक्रोक्तिः इत्यादयः।

एतेषु अलङ्कारेषु काव्यशोभा शब्दाश्रिता एव। उदाहरणार्थम् ' 'रसमयः समयः सः निनाय तैः' – इति यमकालङ्कारस्य उदाहरणे यदि नियतशब्दानां परिवर्तनं क्रियते– रसमयः कालः सः निनाय तैः, चेत् काव्यसौन्दर्यं नष्टं भवति, अलङ्काराभावश्च जायते। अतः यमकालङ्कारः शब्दालङ्कारः। एवमन्येऽपि ज्ञेयाः।

**२. अर्थालङ्कारः –**

योऽलङ्कारः अर्थाश्रितः भवति, सः अर्थालङ्कारः कथ्यते। अर्थालङ्कारेषु चमत्कृतिः अर्थाधारिता भवति,

अत एव शब्दानां परिवर्तनेन काव्यशोभायाः काऽपि क्षतिः न जायते। यथा – उपमा-रूपक-उत्प्रेक्षा-दीपकादयः।

एतेषु अलङ्कारेषु चमत्कारस्य आधारः अर्थो भवति। न तु शब्दः। अतः तुल्यार्थकस्य अन्यशब्दस्य प्रयोगेणापि अलङ्कारहानिर्न जायते।

**३. उभयालङ्कारः –**

योऽलङ्कारः शब्दाश्रितः अर्थाश्रितः इत्थम् उभयाश्रितः प्राप्यते, सः उभयालङ्कारः। यथा – श्लेषः।

## शब्दालङ्काराः

### १. अनुप्रासः

**लक्षणम् –**

**'अनुप्रासः शब्द-साम्यं वैषम्येऽपि स्वरस्य यत्'**

शब्दानां सादृश्यं अनुप्रासः। अत्र 'शब्द-साम्यं' इत्यस्याभिप्रायः अस्ति यत् शब्दसाम्ये स्वरव्यञ्जनयोरुभयोः अनिवार्यता नास्ति। यत्र स्वराणां असादृश्येऽपि केवलं व्यञ्जनानामेव सादृश्यं भवति तत्रापि अनुप्रासः अलङ्कारः भवति। वस्तुतः वर्णानां रसानुगतः प्रकर्षेण न्यासः अनुप्रासः भवति।

**उदाहरणम् –**

**ततो मृगेन्द्रस्य मृगेन्द्रगामी, वधाय वध्यस्य शरं शरण्यः।**
**जाताभिषङ्गोर्नृपतिर्निषङ्गा दुद्धर्तुमैच्छत् प्रसभोधृतारि ।।**

अत्र 'मृगेन्द्र, वध, शर, षङ्ग इत्यादिषु शब्देषु क्वचित् स्वरव्यञ्जनयोः उभयोः क्वचित् व्यञ्जनमात्रस्य साम्यम्। अतः अत्र अनुप्रासः अलङ्कारः विद्यते।

**अनुप्रासोऽयम् पंचधा भवति –**

१. छेकानुप्रासः – अनेक व्यञ्जनानामेकवारं साम्यम्।
२. वृत्यनुप्रासः – एकानेकवर्णानामनेकवारं साम्यम्।
३. श्रुत्यनुप्रासः – समानस्थानीयानां वर्णानां साम्यम्।
४. अन्त्यानुप्रासः – पादान्तानां व्यञ्जनानां पूर्व स्वरेण सह आवृत्तिः।
५. लाटानुप्रासः – तात्पर्य-भेदे सति समानार्थकाणां शब्दानाम् आवृत्तिः।

### २. यमकम्

**लक्षणम् –**

**'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते'।।**

यत्र सार्थकयोः परन्तु परस्परं भिन्नार्थकयोः द्वयोः वर्णसंघातयोः क्रमेण आवृत्तिर्भवति तत्र यमकालङ्कारः जायते। यमकशब्दस्य अर्थः युगलं युग्मं वा भवति। यदा पद्ये सक्रमस्य स्वरव्यञ्जन-समुदायस्य

आवृत्तिः प्राप्यते। परं तेषाम् आवृत्तानां शब्दानाम् अर्थः पृथक् पृथक् भवति, तत्र यमकालङ्कारः स्यात्।

यमकालङ्कारे आवृत्तेषु स्वरव्यञ्जन-समुदायेषु -

१. कदाचित् आवृत्तस्य पदसमुदायस्य उभे पदे सार्थके भवतः।

२. कदाचित् एकं पदं सार्थकं द्वितीयञ्च निरर्थकं भवति।

३. कदाचित् उभेपदे निरर्थके भवतः।

**उदाहरणम् -**

**नवपलाश-पलाशवनम्पुरः, स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्, स सुरभिं सुरभिं सुमनोभरैः।।**

**उदाहरणसङ्गतिः -**

अस्मिन् उदाहरणे यमकालङ्कारः अस्ति। यतोहि अत्र प्रथमपादे पलाशद्वयस्य अर्थद्वयमस्ति। प्रथमपलाशस्य अर्थः पत्रम्, द्वितीय 'पलाश' शब्दस्य अर्थः पलाशवृक्षः अस्ति। तथैव च चतुर्थपादे प्रथम-सुरभिपदस्य अर्थः सुगन्धः द्वितीयसुरभिपदस्य अर्थः वसन्त-ऋतुः अस्ति। अत्र प्रथमचतुर्थपादयोः आवृत्तयोः उभयोः पलाशसुरभि-पदयोः सार्थकत्वं विद्यते।

## ३. श्लेषः

**लक्षणम् -**

**'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।'**

यत्र श्लिष्टैः पदैः अनेकार्थानाम् अभिधानं क्रियते तत्र श्लेषालङ्कारः भवति। लक्षणे 'श्लिष्टः' इति पदस्य अभिप्रायः अनेकार्थकेन शब्देन अस्तिः। अस्मिन् अलङ्कारे एकस्मिन् पदे एव अर्थद्वयं अधिकं वा प्राप्यते।

**उदाहरणम् -** **उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः।**

**उदाहरण सङ्गतिः -**

अत्र 'कीलालः' पदं श्लिष्टपदमस्ति। कीलालपदस्य प्रथमः अर्थः जलं द्वितीयश्च रक्तम् अस्ति। तथैव वाहिनीपतिः द्वितीयः श्लिष्टपदमस्ति वाहिनीपतिपदस्य अर्थद्वयम् विद्यते। प्रथमः अर्थः समुद्रः द्वितीयः अर्थः च सेनापतिः अस्ति। अतएव श्लिष्टपदैः अत्र अनेकार्थानां प्राप्ति भवति। अतः श्लेषालङ्कारः अस्ति।

# अर्थालङ्काराः

## ४. उपमा

**लक्षणम् -**

**'प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते'।**

साम्यं = सादृश्यं उपमा इति अलङ्कारः अभिधीयते = कथ्यते। कीदृशं साम्यं-प्रस्फुटम् सुन्दरम् च। यद्यपि रूपकालङ्कारेऽपि साम्यं तु भवति किन्तु तत्र उपमानोपमेययोः मध्ये अभेदत्वात् साम्यस्य

स्फुटप्रतीतिः न भवति। अतः अत्र 'प्रस्फुटं' इति पद ग्रहणेन लक्षणस्य व्याप्ति रूपकालङ्कारे न भवति। एवमेव 'सुन्दर' पद ग्रहणस्य अभिप्रायः यत् साम्यं वैचित्र्यपूर्णं भवेत् सामान्ये साम्ये यथा– गौरिव गवयः इत्यादिषु प्रयोगे साम्येऽपि जाते वैचित्र्याभावे नास्त्युपमालङ्कारः ।

**उपमायाः अवयवानिः–** उपमायाः चत्वारि अवयवानि –

१. उपमेय – यस्य पदार्थस्य उपमा–साम्यं क्रियते।

२. उपमान – येन सह उपमा–साम्यं क्रियते।

३. साधारणधर्मः – उपमेयोपमानयो समान गुणाः क्रियादयः।

४. वाचकः शब्दः – उपमेयोपमानयोः सादृश्य–सूचकः शब्दः।

यत्र एतेषां सर्वेषां अवयवानां सति साम्यं भवति तत्र पूर्णोपमा यत्र च एकानेकानां अनुक्ते सति साम्यं भवति तत्र लुप्तोपमा भवति। अनयोः द्वयोः भेदयोः अपि श्रौती, आर्थी च इति भेदद्वयं अपि भवति उपमालङ्कारे उपमेयोपमानयोः साम्यं क्रियागतं, गुणगतं उभयगतञ्चेति त्रिविधं भवति। इत्थं एभिः भेदोपभेदैः उपमा अनेकधा भवति।

**उदाहरणम् –**

**१. हंसीव कृष्ण। ते कीर्तिः स्वर्गङ्गामवगाहते।**

अत्र उपमेयः– कीर्ति, उपमानः–हंसी, साधारण धर्मः–स्वर्गङ्गावगाहते वाचकः–इव। अत्र चतुर्णाम् उपमावयवानां विद्यमानत्वात् पूर्णोपमा विद्यते।

**२. स्नपयति हृदयेशं स्नेह–निष्यन्दिनी ते**
**धवलबहल–मुग्धादुग्ध–कुल्येव दृष्टिः।**

अत्र स्नपयति इति क्रिया साम्यं स्नेहनिष्यन्दिनी, धवलबहलमुग्धा इति गुण सादृश्यञ्च। 'ते दृष्टिः' उममेयः अस्ति, दुग्ध कुल्या उपमानः अस्ति, इव साधारण धर्मः। अतः अत्र क्रिया साम्यं गुण साम्यं च उभयसाम्यत्वात् उभयगत पूर्णोपमा अलङ्कारः अस्ति।

## ५. रूपकम्

**लक्षणम् –**

**'तद्रूपकमभेदो यः उपमानोपमेययोः'।**

'रूपयति इति रूपकम्', अस्यार्थः यत्र उपमानस्य आरोपणं उपमेये भवति तत्र रूपकं भवति। रूपकालङ्कारे उपमानोपमेययोः स्वरूपतः भेदेऽपि अति–साम्य–प्रदर्शनाय काल्पनिकोऽभेदारोपो भवति।

**उदाहरणम् –**

**संसार–विषवृक्षस्य द्वे एव रसवत्फले ।**
**काव्यामृत–रसास्वादः संगमः सज्जनैः सह।।**

**लक्षणसङ्गति** – उदाहरणेऽस्मिन् उपमेये–'संसार' उपमानस्य–'विषवृक्षस्य' आरोपः अस्ति। एवमेव काव्ये अमृतस्य आरोपः अस्ति। अस्मात् रूपकालङ्कारः अत्र।

**रूपकभेदाः** – रूपकं प्रामुख्येन त्रिविधं भवति –

(क) साङ्गरूपकम् (ख) निरङ्गरूपकम् (ग) परम्परितरूपकम्

## ६. उत्प्रेक्षा

**लक्षणम्** –

**'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना'।**

यदा प्रकृतस्य (उपमेयस्य), परात्मना (उपमानेन) सह (एकात्म-भावस्य) सम्भावना प्रदर्श्यते, तदा उपमेय-उपमानयोः एकीभावस्य सम्भावनोत्थितः अलङ्कारः उत्प्रेक्षा। उत्प्रेक्षा शब्दस्य अर्थः सम्भावना एव। उत्प्रेक्षालङ्कारबोधकैः मन्ये, शङ्के, ध्रुवम् प्रायः इव नूनमित्यादिभिः शब्दैः उत्प्रेक्षा व्यज्यते। उक्तमपि –

**मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।**
**उत्प्रेक्षा व्यच्यते शब्दैरिव शब्दोऽपि तादृशः।।**

**उदाहरणम्** –

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलतां गता।।**

अत्र अन्धकाराधिक्यं वर्णयन् कवि सम्भावना प्रकटयति यत् तमः अङ्गानि लिम्पति इव, नभश्च मन्ये अञ्जनं वर्षति, दृष्टिश्च असत्पुरुषसेवा इव विफलतां प्राप्ता। अत्र अविद्यमानेन उपमानेन सह सम्भावना प्रदर्श्यते अतः उत्प्रेक्षा अलङ्कारः अस्ति।

**उपमा-उत्प्रेक्षयोः भेदः** –

सामान्येन उपमा उत्प्रेक्षा च उभेऽपि समानमेव प्रतीयेते। परं साम्याधारिते उपमालङ्कारे उपमेय-उपमानयोः विद्यमानता अस्तित्त्वम्-आवश्यकं भवति। उत्प्रेक्षा अलङ्कारे च उपमेय-उपमानयोः सम्भावना व्यज्यते। विषयेऽस्मिन् उपमानस्य अस्तित्वं लोकसिद्धत्वं वा आवश्यकं न भवति।

एवम् उपमालङ्कारः साम्याधारितो भवति, उत्प्रेक्षा च सम्भावनोत्थितः।

## ७. अर्थाऽन्तरन्यासः

**लक्षणम्** –

**'सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**
**यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा'।।**

अर्थात् यत्र साधर्म्येण वैधर्म्येण वा सामान्यस्य विशेषेण-विशेषस्य सामान्येन वा समर्थ्यते तत्र अर्थान्तरन्यासोऽलङ्कारः स्यात्। अस्मिन् अलङ्कारे द्वे स्वतन्त्रवाक्ये समर्थ्यसमर्थकभावेन तिष्ठतः, प्रथमवाक्य-उक्त-कथनम् अन्येन वाक्यकथनेन समर्थ्यते, सः अर्थान्तरन्यासः अलङ्कारः।

**उदाहरणम्** –

(क) सामान्यस्य विशेषेण समर्थनम्

**बृहत्सहाय्यः कार्यान्तं क्षोदीयानपि गच्छति।**
**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ।।**

**उदाहरणसङ्गतिः -**

अत्र पूर्वार्धगतः सामान्योऽर्थः 'बृहत्सहाय्यः क्षोदीयानपि कार्यान्तं गच्छति' इति द्वितीयार्धगतेन विशेषेणार्थेन। नगापगाः महानद्या सम्भूय अम्भोधिम् अभ्येति समर्थ्यते अतः अत्र अर्थान्तरन्यासोऽलङ्कारः।

(ख) विशेषस्य सामान्येन समर्थनम् -

**हनूमानब्धिमतरद् दुष्करं किं महात्मना।**

अत्र- 'हनुमानब्धिमतरद्' इति विशेष कथनं 'दुष्करं किं महात्मना' इति सामान्य कथनं विशेषस्य सामान्येन समर्थनत्वात् अत्र अर्थान्तरन्यासोऽलङ्कारो विद्यते।

## ८. विभावना

**लक्षणम् -**

**'विभावना विना हेतुर्कार्योत्पत्तिर्यदुच्यते'।**

यत्र कारणं न भवति तथापि कार्यस्य उत्पत्तिः जायते तत्र विभावना अलङ्कारः भवति।

**उदाहरणम् -**

**शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।**
**ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनंगोप्तरि गाहमाने।।**

अत्र वृष्टिकारणं विनाऽपि दवाग्निः, फलपुष्पवृद्धिः कार्यस्य उत्पत्तिः भवति अतः विभावना अलङ्कारः।

## ९. विशेषोक्तिः

**लक्षणम् -**

**'विशेषोक्तिरखण्डेषु कारणेषु फलावचः'।**

यत्र कारणं तु भवति किन्तु कार्यस्याभावः भवति तत्र विशेषोक्तिः कथ्यते। अस्मिन् अलङ्कारे कारणस्य (हेतोः) प्राप्तिः भवति तथापि कार्यस्य प्राप्तिःन स्यात्।

**उदाहरणम् -**

**धनिनोऽपि निरुन्मादा, युवानोऽपि न चंचला।**
**प्रभावोऽप्यप्रमत्तास्ते, महामहिम शालिनः ।।**

**उदाहरणसङ्गतिः -**

अत्र धनरूपं, युवावस्थारूपं, प्रभुतारूपं च कारणं विद्यमानः अस्ति तथापि क्रमशः उन्माद-चंचल-प्रमादरूप -कार्यस्य अभावः अस्ति। अतएव विशेषोक्तिः अलङ्कारः।

## १०. निदर्शना

**लक्षणम् -**

**'अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः।**
**निदर्शना भवेत् सेयं मम्मटेन यथोदिता' ।।**

यत्र वस्तुद्वयस्य मध्ये परस्परं सम्बन्धः स्थापितः न भवति तत्र वस्तुसम्बन्धस्य कृते उपमायाः

परिकल्पना क्रियते। सा निदर्शना उच्यते। निदर्शना पदस्य शाब्दिकार्थः उदाहरणम् अस्ति। अत्र लक्षणे आगते सति उपमा-परिकल्पकः पदम् अन्ततोगत्वा समानतायाः बोधकः अस्ति।

उदाहरणम् -

**क्व सूर्यप्रभवो वंशः ? क्व चाल्पविषयामतिः।**
**तितिर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।**

उदाहरणसङ्गतिः -

अल्पमत्या सूर्यवंशस्य वर्णनं तथैव भवितुम् अर्हति यथैव उडुपेन सागरतरणस्य प्रयत्नं भवति। अत्र द्वितीयवाक्यं प्रथम वाक्यस्य कृते समानतायाः बोधकः अस्ति।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

(१) अलङ्कारः सौन्दर्यवर्धकं तत्त्वम् उच्यते -

(क) शब्दस्य (ख) अर्थस्य

(ग) शब्दार्थयोः (घ) काव्यशास्त्रस्य ( )

(२) 'उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः' इत्यस्मिन् उदाहरणे अलङ्कारः अस्ति -

(क) यमकम् (ख) श्लेषः

(ग) अनुप्रासः (घ) सर्वे ( )

(३) 'उत्प्रेक्षा' शब्दस्य अर्थः अस्ति -

(क) आरोपः (ख) सम्भावना

(ग) सादृश्यम् (घ) प्रदर्शनम् ( )

(४) विभावना अलङ्कारस्य स्वरूपं भवति -

(क) कारणं विना कार्यकथनम् (ख) कार्यं विना कारण-कथनम्

(ग) भावनां विना कार्यकथनम् (घ) न कोऽपि ( )

(५) 'धनिनोऽपि निरुन्मादा' इत्यस्यां पंक्तौ अलङ्कारः अस्ति -

(क) विभावना (ख) उत्प्रेक्षा

(ग) विशेषोक्तिः (घ) रूपकम् ( )

### रिक्त स्थानानि पूरयत -

१. ..................धर्मान् अलङ्कारान् प्रचक्षते।

२. अनुप्रासः .......................................... वैषम्येऽपि स्वरस्य यत्।

३. श्लिष्टैः पदैरनेकार्थाभिधाने ...................... इष्यते।

४. विशेषोक्तिरखण्डेषु ................... . फलावचः।

५. अभवन् ........................ उपमा परिकल्पकः।

## लघूत्तरात्मकाः प्रश्नाः

१. अलङ्कारः कतिविधं भवति ?

२. प्रस्फुटं सुन्दरं साम्यं कस्मिन् अलङ्कारे भवति ?

३. उत्प्रेक्षा अलङ्कारस्य लक्षणं लिखत।

४. सामान्यं विशेषेण विशेषं वा सामान्येन कस्मिन् अलङ्कारे समर्थ्यते।

५. शशामवृष्ट्यापि विना दवाग्निः– अत्र कोऽलङ्कारः कथं च ?

## दीर्घोत्तरात्मकाः प्रश्नाः

१. उपमारूपकयोः अलङ्कारयोः भेदः सोदाहरणं लिखत।

२. अधोलिखित उदाहरणेषु अलङ्काराणां निर्धारणं कृत्वा तेषां लक्षणं लिखत –

(क) नवपलाशपलाशवनम्पुरः स्फुटपरागपरागतपङ्कजम्।

(ख) लिम्पन्तीव तमोऽङ्गानि, वर्षतीवाञ्जनं नभः।
असत्पुरुष सेवेव दृष्टिर्विफलतां गता।।

(ग) क्व सूर्य प्रभवोवंशः? क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

३. अधोलिखितानां अलङ्काराणां लक्षणपुरस्सरं परस्परं भेदनिर्धारणम् कुरुत–

(क) श्लेषयमकयोः भेदः

(ख) उपमारूपकयोः भेदः

(ग) उत्प्रेक्षारूपकयोः भेदः

(घ) विशेषोक्तिविभावनयोः भेदः